ROLL NO- | | | | | |

## DAV PUBLIC SCHOOLS, ODISHA ZONE
## PERIODIC TEST -II, 2023-24

- Please check that this question paper contains 0**4** printed pages.
- Check that this question paper contains **9** questions.
- Write down the serial number of question in the left side of the margin before attempting it.

## CLASS-VII
## SUBJECT- LOWER SANSKRIT

**Time- 1hr.30min.** **Maximum Marks- 40**

### खण्डः- "क" (अपठितावबोधनम्)

**1. अधोलिखितानुच्छेदं पठित्वा प्रश्नान् उत्तरत।** (1×4=4)

पुरा अस्माकं देशे वहवः प्रसिद्धा: राजानः अभवन्। तेषु दुष्यन्तः नाम एकः नृपः आसीत्। तस्य भार्या शकुन्तला आसीत्। आश्रमे सा पुत्रम् अजनयत्। तस्य पुत्रस्य नाम भरतः आसीत्। भरतः शैशवावस्थायाम् अपि आश्रमे सिंहशावकै: सह क्रिडति स्म। एकदा सः एकस्य सिंहशावकस्य मुखम् उद्घाटयत् अवदत् च - सिंह ! दन्तान् ते गणयिष्यामि । सिंहशावकः अपि जानाति स्म यत् भरतः अपि मया सदृशः शिशु: अस्ति।

**I. एकपदेन उत्तरत-** [1×2=2]

(i) नृपस्य नाम किम् आसीत् ?

(ii) तस्य भार्या का आसीत् ?

**II. पूर्णवाक्येन उत्तरत-** [2×1=2]

(i) पुत्रस्य नाम किम् आसीत् ?

(ii) कुत्र सा (शकुन्तला) पुत्रम् अजनयत् ?

**III.यथानिर्देशम् उत्तरत।** [1/2 ×2=1]

(i) **"राजा"** इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(क) एकः (ख) नृपः (ग) तस्य (घ) सा

(ii) **" प्रसिद्धा: राजानः"** अनयो: किम् विशेषणम् ?

(क) प्रसिद्धा: (ख) राजानः (ग) पुरा (घ) वहवः

### खण्ड: - " ख" (रचनात्मककार्यम्)

2. **चित्रानुसारं मञ्जूषातः उचितपदै: रिक्त-स्थानानि पूरयत।** **[1×5=5]**



(i) इदं _______________चित्रम् अस्ति ।

(ii) अत्र एक: _________ स्नानं करोति ।

(iii) राजकुमार: तत्र _________ वस्त्राणि स्थापयति ।

(iv) समीपे___________ सन्ति ।

(v) चित्रं ___________ अस्ति ।

| | | | | |
|---|---|---|---|---|
| **सुन्दरम्,** | **जलाशयस्य,** | **पस्तरे,** | **वृक्षा:,** | **राजकुमार:** |

## खण्ड: - "ग" (अनुप्रयुक्तव्याकरणम्)

**3. विकल्पेभ्यः उचितशब्दं चित्वा लिखत।** [1×5=5]

(i) __________ विद्यालयं गच्छामि।

(क) सः (ख) अहम् (ग) त्वम् (घ) वयम्

(ii) _________ मार्गे क्रीडन्ति।

(क) बालकः (ख) बालकौ (ग)बालका: (घ) बालके

(iii) ___________ संस्कृतं पठामः।

(क) ते (ख) अहम् (ग) त्वम् (घ) वयम्

(iv) __________ सत्यं वदसि।

(क) त्वम् (ख) अहम् (ग) यूयम् (घ) वयम्

(v) ___________ फलानि खादतः।

(क) बालकः (ख) बालकौ (ग)बालका: (घ) बालके

**4. विकल्पेभ्यः उचितधातुरूपं चित्वा लिखत।** [1×5=5]

(i) त्वं देवालयं ____________।

(क) गच्छति (ख) गच्छसि (ग) गच्छामि (घ) गच्छ

(ii) अहं अद्य व्याकरणं ______________।

(क) लिखामि (ख) लिखसि (ग) लिख (घ) लिखति

(iii) बालकौ संस्कृतं __________________।

(क) पठति (ख) पठतः (ग) पठन्ति (घ) पठामः

(iv) वयं कन्दुकं ____________।

(क) क्रीडति (ख) क्रीडसि (ग) क्रीडामः (घ) क्रीड

(v) बालकः उच्चैः ______________।

(क) हसति (ख) हससि (ग) हसामि (घ) हस

**5. प्रत्ययं संयोज्य लिखत।** [1×5=5]

(i) सः विद्यालयं _________ (गम्+क्त्वा) पठति।

(ii) सः तत्र __________ (पठ्+क्त्वा) गच्छति।

(iii) कदापि ___________(हस्+क्त्वा) न वदेत्।

(iv)अहं संस्कृतं ___________(पठ्+तुमुन्) इच्छामि।

(v) ते अन्नं ___________(खाद्+तुमुन्) इच्छन्ति।

## खण्ड: - " घ" (पठित-अवबोधनम्)

**6. अधोलिखितगद्यांशं पठित्वा प्रश्नान् उत्तरत।**

एकस्मिन् नगरे एक: चतुरः नरः आसीत् । सः विद्यायुक्तः परन्तु वञ्चकः आसीत् । सः भिन्नप्रकारेण जनान् वञ्चयित्वा धनसञ्चयं करोति स्म । तस्य गृहे एक बहुमूल्य सुवर्णपात्रम् आसीत्। एकदा सः एकम् उपायम् अचिन्तयत् । सः सर्वत्र घोषणाम् अकरोत् यत् यः कोऽपि एकां नवीनां कथां श्रावयिष्यति तस्मै अहम् एतत् सुवर्णपात्रं दास्यामि । किन्तु यदि सा कथा मया पूर्वश्रुता भविष्यति तदा सः मह्यं पञ्चशतं सुवर्णमुद्रा दास्यति । एतां वार्तां श्रुत्वा बहवः जनाः सुवर्णपात्रस्य लोभेन तस्य गृहम् आगच्छन् अपूर्वा: च कथा: अश्रावयन्।

**I. एकपदेन उत्तरत।** [1×2=2]

(i) एकस्मिन् नगरे क: आसीत् ?

(ii) तस्य गृहे एक बहुमूल्य किम् आसीत्।

**II. पूर्णवाक्येन उत्तरत।** [2×1=2]

सः सर्वत्र किम् घोषणाम् अकरोत् ?

**III. निर्देशानुसारम् उत्तरत।** [1/2×2=1]

(i) "**अपूर्वा: कथा**:" अनयो: किम् विशेषणम् ?

(क) अपूर्वा: (ख) कथा: (ग) सः (घ) नरः

(ii) **"एकदा सः एकम् उपायम् अचिन्तयत्** । " इत्यत्र क्रियापदं किम् ?

(क) एकदा (ख) सः (ग) एकम् (घ) अचिन्तयत्

**7. अधोलिखितनाट्यांशं पठित्वा प्रश्नान् उत्तरत-**

हंसी - आवां कथं सहायतां करवाव?

कच्छपः - भवन्ती माम् आकाशमार्गेण अन्यत्र नयताम् । -

एक: हंस- (चिन्तयित्वा ) आवां काष्ठस्य सहायतया भवन्तम् अन्यत्र नेष्यावः । आवां भवतः सहायतां करिष्यावः परं भवान् मार्गे किमपि न वदिष्यति ।

कच्छपः - आम् शोभनम्।

हंसी - आगच्छतु एतं लगुडं धारयतु ।

(हंसौ कच्छपं लगुडेन धृत्वा आकाशे उदपतताम् )

**I. एकपदेन उत्तरत।** [1×2=2]

(i) केन मार्गेण अन्यत्र नयताम् इति कच्छपः वदति स्म ?

(ii) कः मार्गे किमपि न वदिष्यति इति एकः हंसः अवदत् ?

**II. पूर्णवाक्येन उत्तरत।** [2×1=2]

हंसौ कच्छपं केन धृत्वा आकाशे उदपतताम् ?

**III. निर्देशानुसारम् उत्तरत ।** [1/2×2=1]

(i) "**एतं लगुडम्**" अनयो: मध्ये किम् विशेषणम् ?

(क) एतं (ख) लगुडम् (ग) धारयतु (घ) आगच्छ

(ii) "**भवन्तम् अन्यत्र नेष्यावः**" इत्यत्र क्रियापदं किम् ?

(क) भवताम् (ख) अन्यत्र ( ग) नेष्यावः (घ) अत्र

**8. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु -** [1×2=2]

(i) काकः काकी च **<u>वृक्षे</u>** अवसताम् ।

(क) कः (ख) का (ग) कुत्र (घ) किम्

(ii) काकः विलापं कुर्वन्तीं **<u>काकीम्</u>** अपश्यत् ।

(क) काम् (ख) का (ग) कुत्र (घ) किम्

**9. मञ्जूषायाः उचितं पर्यायपदं चित्वा लिखन्तु-** [1×3=3]

(i) दृष्ट्वा __________________।

(ii) सर्प: __________________।

(iii) समीपम् __________________।

| | | |
|---|---|---|
| पार्श्वम् , | अवलोक्य, | भुजङ्गः |

## <u>BONUS</u>

**अधोलिखितगद्यांशं पठित्वा प्रश्नान् उत्तरत।**

एषः विद्यालयः अस्ति। एषः मम विद्यालयः अस्ति। मम विद्यालयः सुन्दरः अस्ति। अहं प्रतिदिनं विद्यालयं गच्छामि। अहं विद्यालये प्रतिदिनं पाठं पठामि। विद्यालये मम अनेकानि मित्राणि सन्ति।अहं मित्रै: सह क्रीडामि। अस्माकं विद्यालये अनेकानि चित्राणि सन्ति। चित्राणि सुन्दराणि सन्ति। वयं मिलित्वा सुन्दराणि चित्राणि पश्यामः।

I. प्रश्नान् उत्तरत- [1×4=4]

1. मम विद्यालयः कीदृशः अस्ति ?
2. अहं प्रतिदिनं कुत्र गच्छामि?
3. अहं कै: सह क्रीडामि ?
4. वयं मिलित्वा कानि पश्यामः?